तत्पर्य्याय:। सांशयिक:२। इत्यमर:॥ हे संशय विषये स्याद्वादी। संशयमापन्न: सांशयिक: ष्णिक:। संशयमापन्नं मानसं यत्र स्याद्वादी स तथा। संशयमापन्नं मानसं यस्य स तथेति षष्ठान्यपदार्थत्वे संशयितरि पुरुषा-दावप्यं तच्छब्दद्वयप्रवृत्ति: स्यात्। इति भरत:॥

संशयालु:, त्रि, संशयिता। इति हेमचन्द्र:॥

संशयिता, [ ऋ ] त्रि, [ सं+शी+तृच्। ) संशयकर्त्ता। इति हेमचन्द्र:॥

संशरणं, क्ली, (सं+शॄ+ल्युट्।) रणारम्भ:। इति शब्दमाला॥ (संरक्षणम्। यथा, कामन्दकीये। ६। ४।
"लोकानुग्रहमन्विच्छन् शरीरमनुपालयेत्।
राज्ञ: संशरणं धाम शरीरं धर्म्मसाधनम्॥")

संशितं, त्रि, (सं+शो+क्त:।) सम्यक्सम्पा-दितम्। व्रतविषयकयत्नवान्। यथा संशितं व्रतम्। सम्यक् सम्पादितमित्यर्थ:। संशितो ब्राह्मण:। व्रतविषयकयत्नवानित्यर्थ:। इति सिद्धान्तकौमुदी॥

संशुद्धि:, स्त्री, ( सं+शुध+क्तिन्। ) सम्यक् शोधनम्। शरीरमार्ज्जनम्। यथा,—
सम्मार्ज्जनञ्च संशुद्धि: संशोधनविशोधने॥"
इति रत्नमाला॥

संशुष्कं, त्रि, आतपादिना संशोषितवस्तु। संपूर्व्वशुषधातो: क्तप्रत्ययेन निष्पन्नम्॥

संशोधनं, क्ली, (सं+शुध+ल्युट्।) संशुद्धि:। इति रत्नमाला॥

संशोधितं, त्रि (सं+शुध+क्त:।) शुद्धीकृत-वस्तु। यथा,—
"ये लेपा: कुष्ठानां युज्यन्ते निर्गतास्त्रदोषाणाम्
संशोधिताशयानां सद्य: सिद्धिर्भवेत्तेषाम्॥"
इति मधुमती॥

संश्चत्, क्ली, (संचिनोति मायामिति। सं+ चि+"सश्चत्तृपद्‌ हत्।" उणा० २।८५। इति अतिप्रत्ययेन निपातनात् साधु।) कुहक:। इत्युणादिकोष:॥

संश्यान:, त्रिं, (सं+श्यै+क्त:।) शीतेन सङ्कु-चित:। इति मुग्धबोधव्याकरणम्॥

संश्रय:,पुं, (सं+श्रि+अच्।) आश्रय:। यथा,
स्तुता सुरै: पूर्व्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता।
करोतु सा न: शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापद:॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्ये५ अध्याय:॥
(आश्रयस्थानम्। यथा. रामायणे।२।४१।६।
"अहो निश्चेतनो राजा जीवलोकस्य संश्रयम्।
धर्म्यं सत्यव्रतं रामं वनवासे प्रवत्स्यति॥")

संश्रव:, पुं, ( सं+श्रु+अप्। ) अङ्गीकार:। इत्यमर:॥ ( समाक्श्रवणम्। यथा, महा-भारते। १५। ३। ६।
"अथ भीम: सुहृन्मध्ये बाहुशब्दं तदाकरोत्।
स श्रवे धृतराष्ट्रस्य गान्धार्य्याश्चाप्यमर्षण:॥")

संश्रित:, त्रि,(सं+श्रि+क्त:।) आश्रित:। यथा.
"न प्राचीमभित: शम्भोर्नोदीचीं शक्तिसंश्रि-
ताम्।
न प्रतीचीं यत: पृष्ठमतो दक्षं समाश्रयेत्॥"
इति तिथ्यादितत्त्वम्॥

संश्रुत:, त्रि, ( सं+श्रु+क्त:। ) अङ्गीकृत:। इत्यमर:॥ (यथा, रामायणे। ३। १०। ३६।
"मया चैतद्वच: श्रुत्वा कार्त्स्न्येन परिपालनम्।
ऋषीणां दण्डकारण्ये संश्रुतं जनकात्मजे॥")

संश्लिष्ट:, त्रि, आश्लिष्ट:। मिलित:। सम्पूर्व्व-श्लिषधातो: क्तप्रत्ययेन निष्पन्न:॥

संश्लेष:, पुं, (सं+श्लिष+घञ्।) आलिङ्गनम्। इत्यमर:॥ (यथा, महाभारते।१२।१३३।१७।
"संश्लेषञ्च परस्त्रीभिर्दस्युरेतानि वर्जयेत्॥")
मेलनम्॥ (यथा मार्कण्डेये। ३७। १५।
"अनन्तरञ्च संश्लेषमभ्येत्य तदनन्तरम्।
तेषामन्यतमैर्भृत्यै: समाक्रम्यानयद्वशम्॥")

संश्वत्, क्ली, (सं+श्वि+अतिप्रत्ययेन निपा-तनात् सिद्धम्। "संपूर्व्वात् श्वयते: संश्वदिति सुभूतिचन्द्र:।" इत्युणादिटीकायां उज्ज्वल-दत्त:। २। ८५।) माया यथा,—
"संश्वत्तु कुहके ज्ञेयं संश्वत् तत्रैव ते समे।"
इत्युणादिकोष:॥

संसक्त:, त्रि, ( सं+सञ्ज+क्त:। ) संलग्न:। अव्यवहित:। इत्यमर:॥

संसक्ति:, स्त्री, संसक्तता। संपूर्व्वषन्जधातो-र्भावे क्तिन्प्रत्ययेन निष्पन्ना॥

संसत्, } स्त्री, (संसीदन्त्यस्यामिति। सं+
संसद् } सद्+क्विप्।) सभा। इत्यमर:॥
(यथा, रघु:। १६। २४।
"तदद्भुतं संसदि रात्रिवृत्तं
प्रातर्द्विजेभ्यो नृपति: शशंस॥")

संसरणं, क्ली, (सं+सृ गतौ+ल्युट्।) प्राणि-जन्म। असंबाधसैन्यगमनम्। घण्टापथ:। इत्यमर:॥ रणारम्भ:। मेदिनी॥ गमनम्। इति शब्दरत्नावली॥ ( संसार:। यथा, भागवते। १०। ४०। २८।
"पुंसो भवेद्यर्हि संसरणापवर्ग-
स्त्वय्यब्जनाभ सदुपासनया मति: स्यात्॥")

संसर्ग:, पुं, ( सं+सृज्+घञ्। ) सम्बन्ध:। स च समवायादि:। इति न्यायशास्त्रम्॥*॥ पापिष्ठान्त्यजादिसंसर्गप्रायश्चित्तम्। यथा,—
"स्तेयादिना पतित इत्युपक्रम्य उक्तम्। अज्ञा-नतो वत्सरेण पातित्वम्।
"संवत्सरेण पतति पतितेन सहाचरन्।
याजनाध्यापनाद्यौनादेकशय्यासनाशनात्॥"
इति हारीतवचनात्।
ज्ञानतो वत्सरार्द्धेनेति। तदसंस्पृष्टस्तद्दोषाभाव एव। [ क्वचित्।"
"बान्धवोऽपि पृथग्भूत्वा तत् पापं नाप्नुयात्
इति देवलवचनात्॥*॥
"यस्तस्य भुङ्क्ते पक्वान्नं कृच्छ्रार्द्धं तस्य निर्दिशेत्।
शुष्कान्नभोजिन: पादमित्याह भगवान् मनु:॥
तस्याविज्ञातचण्डालसहितैकवेश्मस्थसङ्करीकर-णरूपमूलपापकर्त्तु: द्वितीयसंसर्गिण:। तथा चापस्तम्ब:।
"अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि।
स वै ज्ञात्वा तु कालेन कुर्य्यात्तस्य विशोधनम्॥
चान्द्रायणं पराको वा द्विजातीनां विशोधनम्।
प्राजापत्यन्तु शूद्राणां तथा संसर्गदूषणे॥
येस्तत्र भुक्तं पक्वान्नं कृच्छ्रं तेषां विनिर्द्दिशेत्।
तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते।
तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयते॥"
अत्र तृतीयसंसर्गिण एव प्रायश्चित्तदर्शनात् चतुर्थसंसर्गे दोषो नास्ति। प्रायश्चित्तविवेको-ऽप्येवम्।" इति प्रायश्चित्ततत्त्वम्॥*॥ अथ संसर्गनिरूपणम्। तत्र महापातकिसंसर्गस्य पापहेतुत्वमाह मनु:।
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागम:।
महान्ति पातकान्याहु: संसर्गश्चापि तै: सह॥"
प्रायश्चित्तमपि दर्शितम्।
"एषां पापकृतामुक्ता चतुर्णामपि निष्कृति:।
पतितै: संप्रयुक्तानामिमा: शृणुत निष्कृती:॥
यो येन पतितेनैषां संसर्गं याति मानव:।
स तस्यैव व्रतं कुर्य्यात् तत्संसर्गविशुद्धये॥
प्रायश्चित्तीयतां प्राप्य दैवात् पापकृतेन वा।
न संसर्गं व्रजेत् सद्भि: प्रायश्चित्तेऽकृते द्विज:॥"
पापिष्ठसंसर्गो पातकी भवति इति कल्पश्रुति:॥
विष्णु:। यश्च येन पापात्मना सह संसृजेत् स तस्यैव प्रायश्चित्तं कुर्य्यात्। गौतमोऽप्याह। ब्रह्महसुरापगुरुतल्पगपितृमातृयोनिसम्बन्धाग-स्तेनाभक्ष्यभक्षनास्तिकनिन्दकनिन्दितकर्म्मा-भ्यासिपतितात्याग्यपतितत्यागिन: पतिता: पातकसंप्रयोकाश्च तैश्चाब्दं समाचरन्। निषिद्धपतितसंसर्गात् पततीति श्रुति: कल्प॥ के ते संसर्गप्रकारा इत्यत्राह बृहस्पति:।
"एकशय्यासनं पङ्क्तिर्भाण्डपक्वान्नमिश्रणम्।
याजनाध्यापनं योनिस्तथा च सहभोजनम्।
नवधा सङ्कर: प्रोक्तो न कर्त्तव्योऽधमै: सह॥"
छागलेय:।
"आलापात् गात्रसंस्पर्शात् निश्वासात् सह-
भोजनात्।
सहशय्यासनाध्यायात् पापं संक्रमते नृणाम्॥"
यम:।
"दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति।
यो यस्यान्नमिहाश्नाति स तस्याश्नाति किल्वि-
षम्॥"
देवल:।
"पतितेन सहोषित्वा जानन् संवत्सरं नर:।
मिश्रितस्तेन सोऽब्दान्ते स्वयञ्च पतितो भवेत॥
याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्।
कृत्वा सद्य: पतन्त्येते पतितेन न संशय:॥"
व्यास:।
"ब्रह्महा मद्यप: स्तेनो गुरुतल्पग एव च।